# Shivaproktam Dakshinakailasamahimavarnanam

# શિવપ્રોક્તં દક્ષિણકૈલાસમહિમવર્ણનમ્

## Document Information

Text title : Shivaproktam Dakshinakailasamahimavarnanam

File name : dakShiNakailAsamahimavarNanamshivaproktaM.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 19 | 1-50||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તં દક્ષિણકૈલાસમહિમવર્ણનમ્

- શિવપાર્તવતીસંવાદે -
શિવ ઉવાચ -
શિવે દક્ષિણકૈલાસો વિલાસસ્યાશ્રયો મમ ।
સ યથોત્તરકંલાસસ્તથૈવ સુખદઃ સદા ॥ ૧॥

સુવર્ણમુખરી નામ નદી તત્રાસ્તિ શોભના ।
યત્તીર્થસ્નાનમાત્રેણ મુચ્યતે સર્વકિલ્બિષૈઃ ॥ ૨॥

તત્તીરે કોટિશઃ સન્તિ બિલ્વવૃક્ષા મનોહરાઃ ।
અખણ્ડબિલ્વપત્રાણિ રાજન્તે યત્ર કોટિશઃ ॥ ૩॥

સુવર્ણમુખરીતીરે બહવઃ સન્તિ શાङ્કરાઃ ।
તે સર્વે નિયતાહારા ભસ્મોદ્ધૂલિતવિગ્રહાઃ ॥ ૪॥

શિવપૂજારતાઃ સર્વે નિરીહા નિર્મલાશયાઃ ।
શિવનામૈકનિરતાસ્ત્યક્તભોગા નિરાકુલાઃ ॥ ૫॥

ધ્યાયન્તિ તે મહાદેવં મામનાદ્યન્તમવ્યયમ્ ।
નિષ્કલં નિર્ગુણં શાન્તં શિવમક્ષરમચ્યુતમ્ ॥ ૬॥

સર્વાધારમનાધારં વિદિત્વા માં વસન્તિ તે ।
તત્ર ત્યક્તતનુર્મર્ત્યઃ કીટો વા મશકોઽથવા ॥ ૭॥

ભુક્ત્વા ભોગાન્યથાકામં મત્સ્વરૂપં પ્રયાતિ ચ ।
તત્રાસ્તિ પર્વતઃ કશ્ચિત્સ મદાત્મક એવ હિ ॥ ૮॥

સ તુ લિઙ્ગમયો યસ્માલ્લિઙ્ગાકારઃ સ પર્વતઃ ।
તસ્ય શૈલસ્ય વિધિવદ્વૈશાખે માઘમસિ વા ॥ ૯॥

કૃત્વા પ્રદક્ષિણં સમ્યગ્બ્રહ્મહત્યા વિમુચ્યતે ।
કર્પૂરગૌરં તલ્લિઙ્ગં પશ્ચિમાભિમુખં સદા ॥ ૧૦॥

વર્ણાન્તરં પ્રતિયુગં તસ્ય લિઙ્ગસ્ય જાયતે ।
વિષ્ણુબ્રહ્માદયો દેવા સતતં શિવપૂજકાઃ ॥ ૧૧॥

તલ્લિઙ્ગમતિયત્નેન પૂજયન્તિ મુમુક્ષવઃ ।
સુવર્ણમુખરીતાર્થે સ્નાત્વા સમ્યગ્યથાવિધિ ॥ ૧૨॥

અશેષપાપનિર્મુક્તા ભવિષ્યન્તિ ન સંશયઃ ।
સ્નાત્વા તત્ર વિધાનેન પિતૃન્સન્તર્પ્ય વારિણા ॥ ૧૩॥

અન્નાદિભિશ્ચ સન્તર્પ્ય સર્વપાપૈઃ પ્રમુચ્યતે ।
તત્તીરે શ્રાદ્ધકરણા પિતૃણામૃણબન્ધનાત્ ॥ ૧૪॥

મુચ્યતે મનુજઃ સદ્યઃ પદ્મપત્રમિવામ્ભસા ।
તત્ર સ્નાત્વા વિધાનેન સ્વશક્ત્યા શિવયોગિને ॥ ૧૫॥

દેયં સુવર્ણં યત્નેન મત્પ્રીત્યર્થમતન્દ્રિતૈઃ ।
ભોજનીયઃ પ્રયત્નેન શિવયોગી યથાસુખમ્ ॥ ૧૬॥

સ દુગ્ધપરમાન્નાદ્યૈર્યથેષ્ટં ઘૃતમિશ્રિતૈઃ ।
શિવક્ષેત્રમિદં યસ્માદત એવાત્ર શાઙ્કરાઃ ॥ ૧૭॥

ભોજનીયાઃ પ્રયત્નેનં તોષણીયા ધનાદિભિઃ ।
એકસ્મિન્ભોજિતે શૈવે ભોજિતાઃ કોટિશો દ્વિજાઃ ॥ ૧૮॥

યતઃ શૈવમુખદ્વારા ભુજ્યતે ગિરિજે મયા ।
પરન્તુ શુદ્ધયા ભક્ત્યા વિનયેન વિચક્ષણૈઃ ॥ ૧૯॥

ભોજ્યતે યદિ શૈવેન્દ્રસ્તદા તદ્ભુજ્યતે મયા ।
શિવયોગિનિ સન્તુષ્ટે સન્તુષ્ટોઽસ્મ્યહમમ્બિકે ॥ ૨૦॥

શિવયોગિસ્વરૂપેણ સઞ્ચરામ્યહમેવ હિ ।
શિવક્ષેત્રેષુ સર્વેષુ પૂજ્યા હિ શિવયોગિનઃ ॥ ૨૧॥

અહં તુ પૂજિતઃ સત્યં શિવયોગિનિ પૂજિતે ।
તત્રાદ્રકૃત્તિકાયોગે સન્ધ્યાયામષ્ટમીદિને ॥ ૨૨॥

સમ્પૂજ્યં માં બિલ્વપત્રૈર્બ્રહ્મહત્યા વિમુચ્યતે ।
વૈશાખપૌર્ણમાસ્યાં યઃ સમ્પૂજયતિ તત્ર મામ્ ॥ ૨૩॥

વ્યતીપાતેન યુક્તાયાં સ મોક્ષમધિગચ્છતિ ।
યો માં બિલ્વદલૈઁસ્તત્ર કોમલઃ પૂજયિષ્યતિ ॥ ૨૪॥

સ સદ્ય એવ સંસારાન્મુક્તો ભવતિ સર્વથા ।
શેષઃ પ્રત્યહમાગત્ય તત્ર રત્નૈર્મનોહરૈઃ ॥ ૨૫॥

તદેવ લિઙ્ગમમલં સમ્પૂજયતિ સાદરમ્ ।
અત્યુત્તમૈર્લક્ષરત્નૈર્ભક્ત્યા પ્રીત્યાઽન્વહં મુદા ॥ ૨૬॥

તત્ર કશ્ચિદ્દ્વિજો નિત્યં નિયમેનૈવ સાદરમ્ ।
તુણ્ડેન જલમાનીય મુદા મામભિષિઞ્ચતિ ॥ ૨૭॥

તતશ્ચ બિલ્વપત્રાણિ ભક્ત્યાદાય સ્વશુણ્ડયા ।
મામયતિ યત્નેન પુષ્પૈર્નાનાવિધૈરપિ ॥ ૨૮॥

અયં યદા સમાયાતિ મત્પૂજાર્થમિહ દ્વિપ ।
તત્પૂર્વં ફણિરાડ્રત્નૈઃ પૂજાં કૃત્વા સ ગચ્છતિ ॥ ૨૯॥

તાનિ રત્નાનિ દૃષ્ટ્વાઽયં હસ્તી ગ્રાવાભિશઙ્કયા ।
દૂરીકરોતિ યત્નેન સકોપઃ સત્વરં શિવે ॥ ૩૦॥

એવં પ્રત્યહમેવાયં રત્નાનિ વિમલાન્યપિ ।
દૂરીકૃત્વૈવ બિલ્વૈર્માં પૂજયામાસ ભક્તિતઃ ॥ ૩૧॥

ગજસ્ય ચેષ્ટિતં દૃષ્ટ્વા વિસ્મિતો ભુજગેશ્વરઃ ।
કેન દૂરીકૃતાન્યેતદ્રત્નાનિ વિવિધાન્યપિ ॥ ૩૨॥

એવં વિચિન્તયન્ભૂરિ શેષઃ શોકવશં ગતઃ ।
શિવપૂજાવિધાને યત્પાતકં સમુપાર્જ્યતે ॥ ૩૩॥

તત્કૃતે દુઃખલેશોઽપિ કસ્ય વા નોપજાયતે ।
ઇત્થં વિચિન્ત્ય ભૂયોઽપિ રત્નૈર્નાનાવિધૈઃ ફણી ॥ ૩૪॥

પૂજયિત્વા ચ માં ભક્ત્યા યાતિ લોકં સ્વકં પુનઃ ।
એવમેવ સમાગત્ય પૂજયિત્વા પુનઃ પુનઃ ॥ ૩૫॥

સ યાત્યાયાતિ સતતં પુનરાયાતિ યાતિ ચ ।
ઉભાભ્યાં હસ્તિનાગાભ્યામેવમન્વહમાદરાત્ ॥ ૩૬॥

લિઙ્ગરૂપે મયિ પ્રીત્યા પૂજા વિરચિતા મુહુઃ ।
તતઃ કદાચિત્સફણી પૂજાં કૃત્વા પ્રયત્નતઃ ॥ ૩૭॥

કોઽયમાયાતિ તં દ્રક્ષ્યે નૂનમદ્યેતિ તસ્થિવાન્ ।

શિવપૂજાવિહન્તારં નિહનિષ્યામિ તત્ત્વતઃ ॥ ૩૮॥

દેવો વા માનુષો વાસ્તુ યો વા કો વાભવત્વયમ્ ।
ઇતિ નિશ્ચિત્ય નાગેન્દ્રઃ ક્વચિત્કોણે નિલીય સઃ ॥ ૩૯॥

તસ્થૌ તદા દ્વિપેન્દ્રોઽપિ પૂજાર્થં સમુપાગતઃ ।
દ્વિપોઽપિ તાનિ રત્નાનિ વ્યપનીય સ્વશુણ્ડયા ॥ ૪૦॥

બિલ્વપત્રૈઃ પ્રસૂનૈશ્ચ પૂજાં કર્તું પ્રચક્રમે ।
દ્વિપસ્તસ્મિન્દિને ભૂયો બિલ્વપત્રાણ્યુપાહરત્ ॥ ૪૧॥

પૂજયામાસ માં ભક્ત્યા શિવમેકમનામયમ્ ।
તમેવં વીક્ષ્ય નાગેશઃ સત્વરં સૂક્ષ્મરૂપધૃક્ ॥ ૪૨॥

તદ્દન્તિતુણ્ડદ્વારેણ શિરોમધ્યં જગામ સઃ ।
તતસ્તદ્દંશિતો દન્તી દ્વારસ્તમ્ભે શિલામયે ॥ ૪૩॥

શિરઃ સઙ્ઘર્ષયામાસ સક્રોધં ક્રોધસંયુતઃ ।
તતઃ સઙ્ઘર્ષણેનૈવ સ્ફુટિતં તચ્છિરસ્તદા ॥ ૪૪॥

નિર્જગામ તતો ભોગી નાગેન્દ્રશિરસસ્તદા ।
તતો વિષાર્દિતો દન્તી મૃતો ભૂમૌ પપાત ચ ॥ ૪૫॥

પતિતે દન્તિવર્યેઽસ્મિન્નાગે ચ ગતજીવિતે ।
પ્રાદુરાસ તદા દેવિ સદ્યોઽહં લિઙ્ગમધ્યતઃ ॥ ૪૬॥

જીવયામાસ તૌ ચોભૌ ભક્તિનિષ્ઠૌ મયિ પ્રિયે ।
સ્તુતસ્તાભ્યાં તતો યત્નાત્ ભક્તિપૂર્વં સુરેશ્વરિ ॥ ૪૭॥

વરોઽપિ વવ્રે યત્નેન તદાયં પરમોત્તમઃ ।
ઉભયોરપિ નામ્નેદં લિઙ્ગં પ્રખ્યાતિમેત્વિતિ ॥ ૪૮॥

નામાનુવૃત્તિરસ્ત્વીશ પૃથિવ્યામાવયોઃ સદા ।
મુક્તિસ્ત્વદ્દર્શનાદેવ ભવિષ્યત્યદ્ય સર્વથા ॥ ૪૯॥

ઇત્યુક્તં તદ્વચઃ શ્રુત્વા વરો દત્તસ્તદા શિવે ।
તયોર્મુક્તિરભૂદ્દેવિ મત્સાક્ષાત્કારતસ્તતઃ ॥ ૫૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપ્રોક્તં દક્ષિણકૈલાસમહિમવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૯ । ૧-૫૦॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 19 . 1-50 ..

Notes:

Śiva શિવ describes to Pārvatī પાર્વતી about His yet another Residence i.e. Dakṣiṇa Kailāsa દક્ષિણ કૈલાસ that has the River Suvarṇamukharī સુવર્ણમુખરી with multitudes of Bilva Trees બિલ્વવૃક્ષાઃ along its banks that are home to several Śāṅkara-s શઙ્કરાઃ (Devotees of Saṅkara શઙ્કર) who are always immersed in His dhyana ધ્યાન.
He mentions the mountain that is shaped like a Śivaliṅga શિવલિઙ્ગ, that should be visited variously in the month of Vaiśākha વૈશાખ and Māgha માઘ. There is a Śivaliṅga શિવલિઙ્ગ there, that is as white as camphor કર્પૂરગૌરમ્ that is west facing પશ્ચિમાભિમુખમ્.
Śiva શિવ mentions the merits of appeasing ŚivaYogin-s શિવયોગિનઃ there by several means, as a Way to Appease Him. He highlights about His worship there during Ārdrā Krittikā Yoga આર્દ્રાકૃત્તિકાયોગ on evening of Aṣṭamī અષ્ટમી; and, on Vaiśākha Pūrṇimā વૈશાખ પૂર્ણિમા.
Śiva શિવ narrates the story of the Elephant and the Serpent, who used to conduct worship at the Śivaliṅga શિવલિઙ્ગ in their own way, feeling upset at the other′s offerings. The Serpent finds out that it is an Elephant who removes the offerings that he makes, upon which both end up killing each other in a fight that ensues. Śiva શિવ appears out of the Śivaliṅga શિવલિઙ્ગ and restores the lives as well as Grants Liberation (Mukti મુક્તિ) to both. The story pertains to the temple KālaHastīśvara કાલહસ્તીશ્વર, as described further in the Chapter 19.

Encoded and proofread by Ruma Dewan

*Shivaproktam Dakshinakailasamahimavarnanam*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*